स्कंदोत्पत्ति

स्कंदोत्पत्ति (रामायण बालकांडे)

तप्यमाने तपो देवे देवाः सर्षिगणाः पुरा |
सेनापतिमभीप्संतः पितामहमुपागमन् || 1 ||

ततोऽब्रुवन् सुराः सर्वे भगवंतं पितामहं |
प्रणिपत्य शुभं वाक्यं सेंद्राः साग्निपुरोगमाः || 2 ||

यो नः सेनापतिर्देव दत्तो भगवता पुरा |
तपः परममास्थाय तप्यते स्म सहोमया || 3 ||

यदत्रानंतरं कार्यं लोकानां हितकाम्यया |
संविधत्स्व विधानज्ञ त्वं हि नः परमा गतिः || 4 ||

देवतानां वचः श्रुत्वा सर्वलोकपितामहः |
सांत्वयन्मधुरैर्वाक्यैस्त्रिदशानिदमब्रवीत् || 5 ||

शैलपुत्र्या यदुक्तं तन्न प्रजाः संतु पत्निषु | [स्यथ]
तस्या वचनमक्लिष्टं सत्यमेव न संशयः || 6 ||

इयमाकाशगा गंगा यस्यां पुत्रं हुताशनः |
जनयिष्यति देवानां सेनापतिमरिंदमं || 7 ||

ज्येष्ठा शैलेंद्रदुहिता मानयिष्यति तत्सुतं |
उमायास्तद्बहुमतं भविष्यति न संशयः || 8 ||

तच्छ्रुत्वा वचनं तस्य कृतार्था रघुनंदन |
प्रणिपत्य सुराः सर्वे पितामहमपूजयन् || 9 ||

ते गत्वा पर्वतं राम कैलासं धातुमंडितं |
अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः || 10 ||

देवकार्यमिदं देव संविधत्स्व हुताशन |
शैलपुत्र्यां महातेजो गंगायां तेज उत्सृज || 11 ||

देवतानां प्रतिज्ञाय गंगामभ्येत्य पावकः |
गर्भं धारय वै देवि देवतानामिदं प्रियं || 12 ||

अग्नेस्तु वचनं श्रुत्वा दिव्यं रूपमधारयत् |
दृष्ट्वा तन्महिमानां स समंतादवकीर्यत || 13 ||

समंततस्तदा देवीमभ्यषिंचत पावकः |
सर्वस्रोतांसि पूर्णानि गंगाया रघुनंदन || 14 ||

तमुवाच ततो गंगा सर्वदेवपुरोगमं |
अशक्ता धारणे देव तव तेजः समुद्धतं || 15 ||

दह्यमानाग्निना तेन संप्रव्यथितचेतना |
अथाब्रवीदिदं गंगां सर्वदेवहुताशनः || 16 ||

इह हैमवते पादे गर्भोऽयं सन्निवेश्यतां |
श्रुत्वा त्वग्निवचो गंगा तं गर्भमतिभास्वरं || 17 ||

उत्ससर्ज महातेजाः स्रोतोभ्यो हि तदानघ |
यदस्या निर्गतं तस्मात्तप्तजांबूनदप्रभं || 18 ||

कांचनं धरणीं प्राप्तं हिरण्यममलं शुभं |
ताम्रं काष्णायसं चैव तैक्ष्ण्यदेवाभ्यजायत || 19 ||

मलं तस्याभवत्तत्र त्रपु सीसकमेव च |
तदेतद्धरणीं प्राप्य नानाधातुरवर्धत || 20 ||

निक्षिप्तमात्रे गर्भे तु तेजोभिरभिरंजितं |
सर्वं पर्वतसन्नद्धं सौवर्णमभवद्वनं || 21 ||

जातरूपमिति ख्यातं तदाप्रभृति राघव |
सुवर्णं पुरुषव्याघ्र हुताशनसमप्रभं || 22 ||

तृणवृक्षलतागुल्मं सर्वं भवति कांचनं |
तं कुमारं ततो जातं सेंद्राः सहमरुद्गणाः || 23 ||

क्षीरसंभावनार्थाय कृत्तिकाः समयोजयन् |
ताः क्षीरं जातमात्रस्य कृत्वा समयमुत्तमं || 24 ||

ददुः पुत्रोऽयमस्माकं सर्वासामिति निश्चिताः |
ततस्तु देवताः सर्वाः कार्तिकेय इति ब्रुवन् || 25 ||

पुत्रस्त्रैलोक्यविख्यातो भविष्यति न संशयः |
तेषां तद्वचनं श्रुत्वा स्कन्नं गर्भपरिस्रवे || 26 ||

स्नापयन् परया लक्ष्म्या दीप्यमानं यथानलं |
स्कंद इत्यब्रुवन् देवाः स्कन्नं गर्भपरिस्रवात् || 27 ||

कार्तिकेयं महाभागं काकुत्स्थ ज्वलनोपमं |
प्रादुर्भूतं ततः क्षीरं कृत्तिकानामनुत्तमं || 28 ||

षण्णां षडाननो भूत्वा जग्राह स्तनजं पयः |
गृहीत्वा क्षीरमेकाह्ना सुकुमारवपुस्तदा || 29 ||

अजयत्स्वेन वीर्येण दैत्यसैन्यगणान्विभुः |
सुरसेनागणपतिं ततस्तममलद्युतिं || 30 ||

अभ्यषिंचन् सुरगणाः समेत्याग्निपुरोगमाः |
एष ते राम गंगाया विस्तरोऽभिहितो मया || 31 ||

कुमारसंभवश्चैव धन्यः पुण्यस्तथैव च |
भक्तश्च यः कार्तिकेये काकुत्स्थ भुवि मानवः |
आयुष्मान् पुत्रपौत्रैश्च स्कंदसालोक्यतां व्रजेत् || 32 ||

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकांडे कुमारोत्पत्तिर्नाम सप्तत्रिंशः सर्गः || 37 ||